## 1., Explain the appropriateness of the title of the drama Svapnavāsavadattam of
## Bhāsa in making reference to the incidents of the drama.

মহাকবিনা ভাসেন বিরচিতং স্বপ্নবাসবদত্তম্ নাটকম্ সংস্কৃতনাট্যসাহিত্যস্য একং অমূল্যসম্পদম্। লোকসমাজে প্রচলিতা বাসবদত্তাদয়নয়োঃ বিচ্ছিন্না কাহিনী নাট্যকারেণ একসূত্রেণ গ্রথিতা। তস্মাৎ নাটকস্য কাপি বা অপ্রাসঙ্গিক-ঘটনা ন অবান্তরা অর্থহীনা বা। বিশেষতঃ নাটকস্য পঞ্চমাঙ্কে বর্ণিতং স্বপ্নবৃতান্তং গভীরনাটকীয়তাৎপর্যমণ্ডিতম্। অনেন নাটকস্য নামকরণং তথা কাহিন্যাঃ সুষ্ঠুপরিণতিঃ সম্ভবং ভবতি।

বাসবদত্তাপ্রণয়মগ্নস্য উদয়নস্য রাজ্যং শত্রুণা আরুনিনা অধিকৃতম্। বাসবদত্তায়াঃ বিলাসিতায়াং মগ্ন-রাজ্ঞঃ উদয়নস্য রাজ্যোদ্ধারবিষয়ে কাপি চেষ্টা নাসীৎ। অতঃ বিচক্ষণেন মন্ত্রিণা যৌগন্ধরায়নেন রাজ্যোদ্ধারায় নিপুনা পরিকল্পনা কৃতা। যৌগন্ধরায়ণস্য পরিকল্পনা এবমাসীৎ মগধরাজকুমার্য্যাঃ পদ্মাবত্যা সহ উদয়নস্য বিবাহেন মগধরাজ্যেন সহ উদয়নস্য মৈত্রী স্থাপনম্। তস্মাৎ যৌগন্ধরায়ণ পুষ্পকভদ্রকাদিভিঃ ভবিষ্যদ্বাণী কারয়তি যৎ পদ্মাবতী উদয়নস্য ভাবীমহিষী ভবিষ্যতি ইতি। কিন্তু জীবিতায়াং বাসবদত্তায়াং উদয়নস্য দ্বিতীয়বিবাহম্ অসম্ভবম্। ততঃ যৌগন্ধরায়নেন বাসবদত্তয়া সহ একা অপরা পরিকল্পনা কৃতা। উদয়নস্য অনুপস্থিত্যবসরে লাবানকস্য আশ্রয়স্থলে তেন অগ্নিসংযোগং কৃতম্। তৎ সহ রাজ্যে এবং রটয়তি যৎ-অগ্নিদাহেন বাসবদত্তায়াঃ মৃত্যুঃ অভবৎ। পুনঃ তৎ রক্ষণায় গতস্য যৌগন্ধরায়ণস্যাপি মৃত্যুঃ অভবৎ। অতঃ পরিব্রাজকস্য ছদ্মবেশেন যৌগন্ধরায়নঃ স্বামীপরিত্যক্তা ভগিনীরূপেণ বাসবদত্তাং উপস্থাপ্য পদ্মাবত্যাঃ সমীপে তাং ন্যাসরূপেণ স্থাপণম্ অকরোৎ।

ঘটনাক্রমেণ পদ্মাবত্যা সহ উদয়নস্য বিবাহং সম্পন্নমভবৎ। কিন্তু উদয়নস্য মনসঃ বাসবদত্তাস্মৃতিঃ ন বিলুপ্তা। পরন্তু বাসবদত্তাং প্রতি তস্য প্রগাঢ়মনুরাগং বিদুষকেণ সহ কথোপকথনেন প্রস্ফুটিতম। পদ্মাবত্যাপি এবং পরিজ্ঞাতম্।
ফলতঃ পদ্মাবত্যাঃ শিরবেদনয়া নাটকস্য পঞ্চমাঙ্কং প্রারম্ভং ভবতি। এতদ্ জ্ঞাত্বা পদ্মাবত্যা সহ সাক্ষাৎকারায় উদয়নঃ সমুদ্রগৃহম্ অগচ্ছৎ। তত্র গত্না পদ্মবত্যাঃ নিমিত্তং শয্যায়াং অপেক্ষমানঃ উদয়নঃ বিদূষকস্য কথা শৃণ্বন্ নিদ্রাভিভূতমভবৎ। বিদূষকঃ রাজ্ঞে গাত্রবস্থায় অগচ্ছৎ।

অন্যত্র পদ্মাবত্যাঃ ঈদৃশ্যাঃ অবস্থায়াঃ বার্তাং শ্রুত্বা তস্যাঃ কুশলজ্ঞানার্থং বাসবদত্তা সমুদ্রগৃহং আগতবতী। তত্র অস্পষ্টদীপালোকেন শয়িতাং পদ্মাবতীং জ্ঞাত্বা উদয়নস্য পার্শ্বে শয়নবতী বাসবদত্তা। অস্মিন্ সময়ে নিদ্রিতঃ উদয়নঃ স্বপ্নাবেশেন হা প্রিয়ে, হা প্রিয়শিষ্যে, বাসবদত্তে ইতি বিলপতি। বিস্মিতা বাসবদত্তা শয্যাৎ উত্থায় নেত্রসুখেন স্বীয়প্রাণনাথং দর্শয়তি- 'যাবমুহূর্তকং স্থিত্বা দৃষ্টিং হৃদয়ং তোষয়ামি।' কিয়ৎ দন্ডং তত্র স্থিত্বা কস্যচিদ্ বা দর্শণস্য আশঙ্কয়া তৎ স্থানং ত্যক্তবতী। কারণস্য কস্যাপি দর্শনেন যৌগন্ধরায়ণস্য পরিকল্পনা বিফলা ভবিষ্যতি। অস্মিন্নবসরে সা উদয়েনন সহ অল্পাধিকং বার্তাপি অকরোৎ। গমনাৎ প্রাক্ উদয়নঃ স্বপ্নাবিষ্টেন বাসবদত্তাং আলিঙ্গিতুমিচ্ছতি। ততঃ বাসবদত্তা সাবধানেন তৎ হস্তং শয্যায়াং স্থাপনং কৃত্বা সন্তর্পণেন তস্মাৎ বর্হিঃ আগচ্ছৎ 'শয্যাবলম্বিতম্ আর্য্যপুত্রস্য হস্তং শয়ণীয়ে আরোপ্য গমিষ্যামি'

'স্বপ্নবাসবদত্তম' নাটকস্য পঞ্চমাঙ্কে বর্ণিতমিদং স্বপ্নবৃত্তান্তং বিশেষতাৎপর্যপূর্ণম্। স্বপ্নদর্শনাৎ হি নাটকস্য নামকরণং ভবতি 'স্বপ্নবাসবদত্তম্'। স্বপ্নাবস্থায়ামপি বাসবদত্তাং দৃষ্টা উদয়নস্য ইয়ং ধারণা

অভবৎ যৎ বাসবদত্তা জীবিতা। তস্মাৎ ষষ্ঠাঙ্কে বাসবদত্তায়াঃ তথা ব্রাহ্মণস্য যৌগন্ধরায়নস্য প্রকৃতপরিচয়ম্ উদ্ঘাটনে রাজা ন অধিকবিস্মিতঃ। অনেন নাট্যকারেণ উদয়নং এবমপি জ্ঞাপয়তি যৎ বাসবদত্তা স্বীয়চরিত্রং রক্ষিতং জীবতি-যতঃ রাজা বাসবদত্তায়াঃ প্রসাধনবর্জিতং মুখং দৃষ্টবান। অনেন বাসদত্তায়াঃ পুনরাবির্ভাবং সম্মানজনকম্ অভবৎ। অতঃ দৃশ্যতে স্বপ্নবৃত্তান্তং নাটকস্য মিলনান্তকপরিণতেঃ বিশেষগুরুত্বপূর্ণম্ ন কেবলং নামকরণে।

**Discuss the importance of the role played by Yaugandharāyaṇa in the development of the drama Svapnavāsavadattam.**

মহাকবিনা ভাসেন বিরচিতং স্বপ্নবাসবদত্তম্ নাটকম্ সংস্কৃতনাট্যসাহিত্যস্য একং অমূল্যসম্পদম্। লোকসমাজে প্রচলিতা বাসবদত্তাদয়নয়োঃ বিচ্ছিন্না কাহিনী নাট্যকারেণ একসূত্রেণ গ্রথিতা। তস্মাৎ নাটকস্য কাপি বা অপ্রাসঙ্গিক-ঘটনা ন অবান্তরা অর্থহীনা বা। যৌগন্থরায়ণঃ আসীৎ বৎসরাজস্য উদয়নস্য বিশ্বস্তঃ তথা হিতৈষীপ্রধানমন্ত্রী। সঃ বিচক্ষণঃ কূটনীতিজ্ঞঃ, রাজনীতিজ্ঞঃ চ। বাসবদত্তাদয়নয়োঃ কথামূলে সর্বদা যৌগন্ধরায়ণস্য প্রভাবঃ দৃশ্যতে। যৌগন্ধরায়ণঃ স্বীয়প্রভোঃ বৎসরাজস্য উদয়নস্য হিতচিন্তায়াং সদা ব্যাপৃতঃ। উদয়নস্য শ্রীবৃদ্ধিঃ হি তস্য ধ্যানং জ্ঞানঞ্চ। তস্য মতে-'স্বামিভাগ্যানুগস্তারো বয়ম্'

বাসবদত্তাপ্রণয়মগ্নস্য উদয়নস্য রাজ্যং শত্রুণা আরুনিনা অধিকৃতম্। বাসবদত্তায়াঃ বিলাসিতায়াং মগ্ন-রাজ্ঞঃ উদয়নস্য রাজ্যোদ্ধারবিষয়ে কাপি চেষ্টা নাসীৎ। অতঃ বিচক্ষণেন মন্ত্রিণা যৌগন্ধরায়নেন রাজ্যোদ্ধারায় নিপুনা পরিকল্পনা কৃতা। যৌগন্ধরায়ণস্য পরিকল্পনা এবমাসীৎ মগধরাজকুমার্য্যাঃ পদ্মাবত্যা সহ উদয়নস্য বিবাহেন মগধরাজ্যেন সহ উদয়নস্য মৈত্রী স্থাপনম্। তস্মাৎ যৌগন্ধরায়ণ পুষ্পকভদ্রকাদিভিঃ ভবিষ্যদ্বাণী কারয়তি যৎ পদ্মাবতী উদয়নস্য ভাবীমহিষী ভবিষ্যতি ইতি। কিন্তু জীবিতায়াং বাসবদত্তায়াং উদয়নস্য দ্বিতীয়বিবাহম্ অসম্ভবম্। ততঃ যৌগন্ধরায়নেন বাসবদত্তয়া সহ একা অপরা পরিকল্পনা কৃতা। উদয়নস্য অনুপস্থিত্যবসরে লাবানকস্য আশ্রয়স্থলে তেন অগ্নিসংযোগং কৃতম্। তৎ সহ রাজ্যে এবং রটয়তি যৎ-অগ্নিদাহেন বাসবদত্তায়াঃ মৃত্যুঃ অভবৎ। পুনঃ তৎ রক্ষণায় গতস্য যৌগন্ধরায়ণস্যাপি মৃত্যুঃ অভবৎ। অতঃ পরিব্রাজকস্য ছদ্মবেশেন যৌগন্ধরায়নঃ স্বামীপরিত্যক্তা ভগিনীরূপেণ বাসবদত্তাং উপস্থাপ্য পদ্মাবত্যাঃ সমীপে তাং ন্যাসরূপেণ স্থাপণম্ অকরোৎ। পতিমঙ্গলায় বাসবদত্তা সর্বেষু সম্মতা। অথচ যৌগন্ধরায়নেন পদ্মাবত্যাঃ সহ উদনয়স্য বিবাহস্য কথা বাসদত্তায়াঃ সমীপে অপ্রকাশিতা। তস্য একমাত্রং ধ্যানমাসীৎ-কৌশাম্বিমাত্রং পরিপালয়ামি।

বিচক্ষণঃ মন্ত্রী যৌগন্ধরায়নঃ আসীৎ লোকাভিজ্ঞঃ। মনুষ্যাণাং প্রকৃতিঃ, -অদৃষ্টমাদিবিষয়েষু আসীৎ তস্য প্রগাঢ়-অভিজ্ঞতা। বাসবদত্তা যদা পদ্মাবত্যাঃ ভূত্যৈঃ অপসারণস্য আশঙ্কা অকরোৎ, তদা যৌগন্ধরায়নেনোক্তম্— 'কালক্রমেণঃ জগতঃ পরিবর্তমানা চক্রার পঙিরিব গচ্ছতি ভাগ্যপংক্তি"। পুনঃ পদ্মাবত্যাঃ হস্তয়োঃ বাসবদত্তাং সমর্পিত্য তেনোক্তম্-"শক্তা চরিত্রং রক্ষিতুং মে ভগিন্যাঃ"। সিদ্ধবাক্যে তস্য যথেষ্টং বিশ্বাসমাসীৎ-
"ন হি সিদ্ধবাক্যানুৎক্রম্য গচ্ছতি বিধিঃ সুপরীক্ষিতানি"।

'স্বপ্নবাসবদত্তম্' নাটক যৌগন্ধরায়ণঃ কেবলং দ্বিসংখ্যকং দৃশ্যতে। নাটকস্য প্রারম্ভে অন্তিমে চ। যৌগন্ধরায়ণঃ হি নাটকে নায়িকানায়কয়োঃ ভাগ্যনির্নায়কঃ। কিন্তু তস্য হি পরিকল্পনানুসারেণ নাটকস্য সূত্রাপাতং পরিণতিঃ চ। তস্য হি অঙ্গুলিলেহনেন সর্বাঃ পরিচালিতাঃ ভবন্তি। তেন যৎ কৃতং

তৎ সর্বং হি প্রভোঃ উদয়ণস্য শ্রীবৃদ্ধেঃ। স হি পুষ্পকভদ্রাদিভিঃ পদ্মাবত্যোদয়নয়োঃ বিবাহস্য ভবিষ্যদ্বানী কৃতবান্। তেনহি লাবানকগ্রামে বাসবদত্তাদয়নয়োঃ বাসস্য ব্যবস্থা কৃতা। তেন হি অগ্নিকাণ্ডেন উদয়ণাৎ বাসবত্তা অপসৃতা, পদ্মাবত্যাঃ বিবাহস্য পশ্চাতপটং নির্মিতম্। পদ্মাবত্যাঃ সমীপে বাসবদত্তা ন্যাসীকৃতা। এতদ্ সর্বং কৃত্বাপি যৌগন্ধরায়ণস্য মনসি আশঙ্কা জায়তে কারণং তেন অজ্ঞাতসারেণ সর্বং কৃতম্, যদ্যপি বা তৎ সর্বং মঙ্গলং অভবৎ। ততঃ তেনোক্তম্-

'সিদ্ধেহপি নাম মম কর্মাণি পার্থিবোহসৌ। কিং বক্ষ্যতীতি হৃদয়ং পরিশংকিতং মে ।।

অন্তিমে পুনঃ স্বেচ্ছাচার্যর্থং উদয়ণস্য সমীপে ক্ষমা প্রার্থনা কৃতা তেন। উদয়ণঃ অপি যৌগন্ধরায়ণস্য কূটনীতেঃ প্রশংসা কৃত্বা অবদৎ-

মিথ্যোন্মাদৈশ্চ যুদ্ধৈশ্চ শাস্ত্রদৃষ্টৈশ্চ মন্ত্রিতৈঃ।
ভবদ্যত্নৈঃ খলু বয়ং মজ্জমানাঃ সমুদ্ধৃতাঃ।।

৩. নাট্যকাররূপেণ মহাকবেঃ ভাসস্য বৈশিষ্ট্যং রচনাশৈলী বা আলোচ্যতাম্।

উঃ মহাকবিঃ ভাসঃ আসীৎ সংস্কৃতনাট্যসাহিত্যকাশস্য উজ্জ্বলঃ জ্যোতিষ্কঃ। সংস্কৃতনাট্যকারেষু ভাস হি সর্বাধিকানি নাটকানি বিরচিতানি। ন কেবলং সংখ্যাবিচারেণ অপি তু গুণগতোৎকর্ষেণ বৈচিত্রেণ চ নাটকানি মহত্ত্বপূর্ণানি।

নাট্যশাস্ত্রস্য বিধানানুসারেণ স যদ্যপি রামায়ণমহাভারতাদিপ্রসিদ্ধলোকবৃত্তান্তাৎ নাট্যবস্তুণঃ আহরণং কৃতং তথাপি বিষয়বস্তুপরিবেশনে তথা কাহিনীগ্রন্থনায়াং তস্য অসামান্যা মৌলিকতা দৃশ্যতে। ভাষাঃ সংলাপাঃ চ বাহুল্যবর্জিতাঃ। অবান্তরঘটনানামাধিক্যেন নাট্যকারস্য শিল্পনৈপুন্যেন চ চরিত্রানি বাস্তবসম্মতানি জীবন্তানি চ। তস্য নাটকানি রঙ্গমঞ্চেইপি সাফল্যার্জিতানি।

ভাসবিরচিতেষু নাটকেষু মহাভারতাবলম্বানি পঞ্চনাটকানি যথা-দূতবাক্যম্, দূতঘটোৎকচম্, মধ্যমব্যায়োগম্, কর্ণভারম্, উরুভঙ্গম্। ইমানি একাঙ্কবিশিষ্টানি। এষু মধ্যমব্যায়োগম্' ব্যাযোগশ্রেণীভুক্তম্। পঞ্চরাত্রং চ সমবাকারশ্রেণীভুক্তম্। ভাষাণুসারেণ মঞ্চোপযোগীনং একাঙ্কনাটকং সংস্কৃতসাহিত্যে বিরলম্। তেন পুনঃ ত্রিচতুরপঞ্চাঙ্কবিশিষ্টানি নাটকানি, অপি বিরচিতানি।

ভাসস্য চরিত্রচিত্রনঅত্যন্তস্বভাবিকম্। তস্য ত্রয়োদশনাটকেষু প্রায়ঃ দ্বিশতচরিত্রানি রূপায়িতানি। ততঃ বাণভট্টেনোক্তম্ নাটকৈর্বহুভূমিকৈঃ। এষু চরিত্রেষু কিমপি চরিত্রং অপরস্য অনুরূপং ন ভবতি। পুনঃ দৃশ্যতে রামায়ণে বিষ্ণোঃ অবতার রামচন্দ্রঃ ভাসরচনায়াং মহানুভবমানবচরিত্ররূপেণ প্রতিফলিতঃ। মহাভারতস্য খলনায়কঃ দুর্যোধনঃ ভাসস্য 'উরুভভঙ্গম্' নাটকে গুণবান্ নায়করূপেণাবতীর্ণঃ। 'কর্ণভারম্' নাটকে কবিনা কর্ণচরিত্রে মহত্ত্ববীজং দৃষ্টম্। 'স্বপ্নবাসবদত্তম্' নাটকে উদয়ন-বাসবদত্তা-পদ্মাবতী এতেষাং সর্বেষাম্ আত্মত্যাগং অন্তর্দ্বন্দ্বং চ বিন্যাসং কৃত্বা চরিত্রস্য ঔদার্য্যং মহত্ত্বং প্রতিষ্ঠিতং কবিনা। পুনঃ বিদূষকচরিত্রং হাস্যরসিকং কলহপ্রিয়ং তথা রাজসখম্।

চরিত্রচিত্রনেন সহ সংলাপরচনায়ামপি ভাসঃ সিদ্ধহস্তঃ। দীর্ঘসমাসবদ্ধবাক্যং পরিত্যজ্য তেন সরলবাক্যেন সংলাপং পরিবেশিতম্। ততঃ তস্য রচনাশৈলী প্রসাদগুণমণ্ডিতঃ। তস্য সংলাপেষু কুত্রাপি বা পদ্যস্য ব্যবহারং দৃশ্যতে যথা-

"পূর্বং ত্বয়াপ্যভিমতং গতমেবমাসীৎ শ্লাঘ্যং গমিষ্যমি পুনর্বিজয়েন ভর্তুঃ।
কালক্রমেন জগতঃ পরিবর্ত্তমানাঃ চক্রারাপৎস্তিরিব গচ্ছতি ভাস্যপন্তি"।।.

সুচারুপেণ পূর্ববর্তীঘটনয়া সহ সাদৃশ্যেন যৌগন্ধরায়ণস্য পরিকল্পনায়াঃ সাফল্যেঙ্গিতং চিত্রিতম্। ভাসস্য প্রায়েষু সর্বেষু নাটকেষু এবং অর্থবহং তাৎপর্যপূর্ণং সুভাষিতং দৃশ্যতে।

বস্তুতঃ ভাসস্য নাটকং প্রাঞ্জলং স্বাভাবিকম্। মধ্যে অপাণিনীয়শব্দানাং 'ধরন্তে', 'রক্ষান্তে' প্রয়োগেন মন্যতে ভাসময়ে সংস্কৃতভাষা কথ্যভাষাসীৎ।
ভাসস্য নাট্যশৈল্যাঃ অন্যতমং বৈশিষ্ট্যমাসীৎ প্রবাদপ্রবলমিব নীতিগর্ভবাক্যানাং প্রয়োগঃ-যথা- (১) দুঃখং নাসস্য রক্ষণম্ (২) চক্রারপংস্তিরিব গচ্ছতি ভাগ্যপংক্তিঃ (৩) স্ত্রীস্বভাবস্তুঃ কাতরঃ (৪) অনতিক্রমনীয়োঃ হি বিধিঃ ইতি। পরবর্তীনাট্যকারেভ্যঃ ভাসঃ কল্পনাবিলাসপ্রাচুর্যেন আসীৎ সংযতঃ। 'স্বপ্নবাসবদত্তম্' নাটকে দৃশ্যতে ভিন্নানাং চরিত্রনাং অশ্রুপতনস্য কারণং 'কাশপুষ্পপল্লবঃ'। অনেন কিয়ৎ কল্পনাকার্পন্যং নীরসতা চ জায়তে। সমালোচকদৃষ্ট্যা যৎসামান্যং ক্রটিবিচ্যুতিঃ স্থিতেহপি নাটকীয়গতিঃ, চরিত্রচিত্রণনৈপুন্যং, মনস্তাত্বিকবিশ্লেষণং, মানবিকোৎকর্ষং, রচনাসারল্যং ইত্যাদিভিঃ মহাকবিঃ ভাসঃ অদ্বিতীয়মর্যাদাধিকারী ইতি